श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.12- द्वितीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्॥**
**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ द्वादशोऽध्यायः ॥**

### श्रीभगवानुवाच

**न रोधयति मां(म्) योगो, न सां(ङ्)ख्यं(न्) धर्म एव च ।**
**न स्वाध्यायस्तपस्त्यागो, नेष्टापूर्तं(न्) न दक्षिणा ॥ 1॥**

स्वाध्या+ यस्तपस्+ त्यागो

**व्रतानि यज्ञश्छान्दां(व्)सि, तीर्थानि नियमा यमाः ।**
**यथावरुन्धे सत्सं(ङ्)गः(स्), सर्वसं(ङ्)गापहो हि माम् ॥ 2॥**

यज्ञश्+ छान्दां(व्)सि, यथा+ वरुन्धे ,सर्व+ सं(ङ्)गापहो

**सत्सं(ङ्)गेन हि दैतेया, यातुधाना मृगाः(ख्) खगाः ।**
**गन्धर्वाप्सरसो नागाः(स्), सिद्धाश्चारणगुह्यकाः ॥ 3॥**

गन्धर्वाप्+ सरसो, सिद्धाश्+ चारण+ गुह्यकाः

**विद्याधरा मनुष्येषु , वैश्याः(श्) शूद्राः(स्) स्त्रियोऽन्त्यजाः ।**

**रजस्तमः(फ्) प्रकृतयस्- तस्मिं(व्)स्तस्मिन् युगेऽनघ ॥ 4॥**

स्त्रियोऽन्+ त्यजाः, तस्मिं(व्)स्+ तस्मिन्

**बहवो मत्पदं(म्) प्राप्तास्- त्वाष्ट्रकायाधवादयः ।**

**वृषपर्वा बलिर्बाणो, मयश्चाथ विभीषणः ॥ 5॥**

त्वाष्ट्र+ काया+ धवादयः

**सुग्रीवो हनुमानृक्षो, गजो गृध्रो वणिक्पथः ।**

**व्याधः(ख्) कुब्जा व्रजे गोप्यो, यज्ञपत्न्यस्तथापरे ॥ 6॥**

यज्ञ+ पत्न्यस्+ तथापरे

**ते नाधीतश्रुतिगणा, नोपासितमहत्तमाः ।**

**अव्रतातप्ततपसः(स्), सत्सं(ङ्)गान्मामुपागताः ॥ 7॥**

नाधी+तश्रुतिगणा, नोपा+ सित+ महत्तमाः,

अव्रता+ तप्त+ तपसः(स्), सत्सं(ङ्)गान्+ मामुपा+ गताः

**केवलेन हि भावेन, गोप्यो गावो नगा मृगाः ।**

**येऽन्ये मूढधियो नागाः(स्), सिद्धा मामीयुरञ्जसा ॥ 8॥**

मामी+ युरञ्जसा

**यं(न्) न योगेन सां(ङ्)ख्येन, दानव्रततपोऽध्वरैः ।**

**व्याख्यास्वाध्यायसं(न्)न्यासैः(फ्), प्राप्नुयाद् यत्नवानपि ॥ 9॥**

व्याख्यास्+ वाध्याय+ सं(न्)न्यासैः(फ्)

**रामेण सार्धं(म्) मथुरां(म्) प्रणीते,**

**श्वाफल्किना मय्यनुरक्तचित्ताः ।**

**विगाढभावेन न मे वियोग-**

**तीव्राधयोऽन्यं(न्) ददृशुः(स्) सुखाय ॥ 10॥**

श्वा+ फल्किना, मय्यनु+ रक्तचित्ताः, तीव्रा+ धयोऽन्यं(न्)

तास्ताः(ह्) क्षपाः(फ्) प्रेष्ठतमेन नीता,
मयैव वृन्दावनगोचरेण ।
क्षणार्धवत्ताः(फ्) पुनरं(ङ्)ग तासां(म्),
हीना मया कल्पसमा बभूवुः ॥ 11॥

वृन्दा+ वन+ गोचरेण, क्षणार्ध+ वत्ताः(फ्)

ता नाविदन् मय्यनुषं(ङ्)गबद्ध-
धियः(स्) स्वमात्मानमदस्तथेदम् ।
यथा समाधौ मुनयोऽब्धितोये,
नद्यः(फ्) प्रविष्टा इव नामरूपे ॥ 12॥

मय्य+ नुषं(ङ्)ग+ बद्ध ,
स्वमात्मा+ नमदस्+ तथेदम् , मुनयोऽब्+ धितोये

मत्कामा रमणं(ञ्) जार- मस्वरूपविदोऽबलाः ।
ब्रह्म मां(म्) परमं(म्) प्रापुः(स्), सं(ङ्)गाच्छतसहस्रशः ॥ 13॥

मस्वरूप+ विदोऽबलाः ,
सं(ङ्)गाच्छत+ सहस्रशः

तस्मात्त्वमुद्धवोत्सृज्य, चोदनां(म्) प्रतिचोदनाम् ।
प्रवृत्तं(ञ्) च निवृत्तं(ञ्) च, श्रोतव्यं(म्) श्रुतमेव च ॥ 14॥

तस्मात्+ त्वमुद्+ धवोत्+ सृज्य

मामेकमेव शरण- मात्मानं(म्) सर्वदेहिनाम् ।
याहि सर्वात्मभावेन, मया स्या ह्यकुतोभयः ॥ 15॥

सर्वात्+ मभावेन

उद्धव उवाच

संशयः(श्) शृण्वतो वाचं(न्), तव योगेश्वरेश्वर ।
न निवर्तत आत्मस्थो, येन भ्राम्यति मे मनः ॥ 16॥

**श्रीभगवानुवाच**

**स एष जीवो विवरप्रसूतिः(फ्),**

**प्राणेन घोषेण गुहां(म्) प्रविष्टः ।**

**मनोमयं(म्) सूक्ष्ममुपेत्य रूपं(म्),**

**मात्रा स्वरो वर्ण इति स्थविष्ठः ॥ 17॥**

विव+ रप्रसूतिः(फ्), सूक्ष्+ ममुपेत्य

**यथानलः(ख्) खेऽनिलबन्धुरूष्मा,**

**बलेन दारुण्यधिमथ्यमानः ।**

**अणुः(फ्) प्रजातो हविषा समिध्यते,**

**तथैव मे व्यक्तिरियं(म्) हि वाणी ॥ 18॥**

खेऽ+ निलबन्धु+ रूष्मा , दारुण्+ यधिमथ्+ यमानः

**एवं(ङ्) गदिः(ख्) कर्म गतिर्विसर्गो,**

**घ्राणो रसो दृक् स्पर्शः(श्) श्रुतिश्च ।**

**सङ्कल्पविज्ञानमथाभिमानः(स्),**

**सूत्रं(म्) रजः(स्)सत्त्वतमोविकारः ॥ 19॥**

गतिर्+ विसर्गो , सङ्कल्प+ विज्ञान+ मथाभिमानः(स्) ,सत्त्व+ तमो+ विकारः

**अयं(म्) हि जीवस्त्रिवृदब्जयोनि-**

**रव्यक्त एको वयसा स आद्यः ।**

**विश्लिष्टशक्तिर्बहुधेव भाति,**

**बीजानि योनिं(म्) प्रतिपद्य यद्वत् ॥ 20॥**

जीवस्+ त्रिवृदब्+ जयोनि , विश्लिष्ट+ शक्तिर्+ बहुधेव

**यस्मिन्निदं(म्) प्रोतमशेषमोतं(म्),**

**पटो यथा तन्तुवितानसं(व्)स्थः ।**

**य एष सं(व्)सारतरुः(फ्) पुराणः(ख्),**

**कर्मात्मकः(फ्) पुष्पफले प्रसूते ॥ 21॥**

प्रोत+ मशेष+ मोतं(म्) , तन्तु+ वितान+ सं(व्)स्थः

**द्वे अस्य बीजे शतमूलस्त्रिनालः(फ्),**

**पं(ञ्)चस्कन्धः(फ्) पं(ञ्)चरसप्रसूतिः ।**

**दशैकशाखो द्विसुपर्णनीडस्-**

**त्रिवल्कलो द्विफलोऽर्कं(म्) प्रविष्टः ॥ 22॥**

शतमूलस्+ त्रिनालः(फ्) , पं(ञ्)चरस+ प्रसूतिः , द्विसुपर्ण+ नीड

**अदन्ति चैकं(म्) फलमस्य गृध्रा,**

**ग्रामेचरा एकमरण्यवासाः ।**

**हं(व्)सा य एकं(म्) बहुरूपमिज्यैर्-**

**मायामयं(म्) वेद स वेद वेदम् ॥ 23॥**

एक+ मरण्य+ वासाः, बहुरू+ पमिज्यैर्

**एवं(ङ्) गुरूपासनयैकभक्त्या,**

**विद्याकुठारेण शितेन धीरः।**

**विवृश्च्य जीवाशयमप्रमत्तः(स्),**

**सम्पद्य चात्मानमथ त्यजास्त्रम् ॥ 24॥**

गुरूपा+ सनयै+ कभक्त्या ,जीवा+ शयम+ प्रमत्तः(स्) ,चात्मा+ नमथ

**इति श्रीमद्भागवते महापुराणे पारमहंस्यां**

**संहितायामेकादशस्कन्धे द्वादशोऽध्यायः ॥**

**ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**

**ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।**

